A

# समग्रशिक्षा, केरलम्

611

## पादवार्षिकमूल्यनिर्णयः 2024-25

संस्कृतम्
SANSKRIT

कक्ष्या - षष्ठी
STD. - VI

समयः - होराद्वयम्
Time - 2 Hrs

निर्देशाः :-
- उत्तरलेखनात् पूर्वं छात्राणां कृते समाश्वासरूपेण १५ निमेषाः सन्ति।
- पञ्च प्रश्नाः समाधेयाः।
- प्रथमः प्रश्नः अवश्यं समाधेयः।
- उत्तरलेखनाय देवनागरीलिपिः उपयोक्तव्या।

**प्रवर्तनम् १**

**पत्रवार्तां पठित्वा प्रश्नानाम् उत्तराणि लिखतु।**

सुधर्मा

केन्द्र कर्णाटकसर्वकाराभ्यां पुरस्कृता अद्वितीया संस्कृतदिनपत्रिका

SUDHARMA - THE ONLY SAMSKRUTA DAILY

### भारतदेशः २०-२० लोककप्प् विजेता

नवदिल्ली: २०२४ तमे वर्षे जूण् मासे २०-२० लोककप्प् क्रिकट् स्पर्धा वेस्ट्-इन्डीस्, अमेरिकादेशयोः प्रवृत्ता। स्पर्धायाम् आहत्य २० गणाः भागं स्वीकृतवन्तः। ५५ स्पर्धाः आसन्। रोहित् शर्मणः नेतृत्वे भारतदेशः लोककप्प् विजेता अभवत्। भारतीयः जस्प्रीत् बूम्र श्रेष्ठताररूपेण समादृतः।



१. कः श्रेष्ठताररूपेण समादृतः?

२. स्पर्धायां कति गणाः भागं स्वीकृतवन्तः?

३. २०२४ तमे वर्षे २०-२० लोककप्प् कस्मिन् मासे प्रवृत्तम्?

४. कः देशः लोककप्प् विजेता अभवत्?

५. संस्कृतपत्रिकायाः नाम किम्?

प्रवर्तनम् - २

क) कोष्ठकात् उचितं पदं स्वीकृत्य कवितां पूरयतु।

(केर, केरल)

.......देशो मामकदेशः
सुन्दरदेशोऽयम्।
........वृक्षनिबिडेऽस्मिन् देशे
वसन्ति सामोदम्।।





ख) पदच्छेदं लिखतु।

उदा- तथापि - तथा + अपि

१. कदापि - ........+ ........


२. विनापि - ........+ ........

ग) 'व्यायामो हि सदा पथ्यो' इति वचनं कस्मात् स्वीकृतम्?

(रामायणम्, महाभारतम्)

प्रवर्तनम् - ३

क) चित्रं निरीक्ष्य कोष्ठकात् उचितां पादटिप्पणीं लिखतु ।



'कलहः राज्यस्य दुर्दशा'

'देशरक्षा परमो धर्मः'

..........................................

ख) यथोचितं योजयतु।

| | | |
|---|---|---|
| दुर्दशा | - | शूरस्य भावः |
| शौर्यम् | - | ग्रामे भवः |
| ग्रामीणः | - | दुष्टा दशा |

प्रवर्तनम् - ४

**कोष्ठकात् उचितं वाक्यं चित्वा पट्टिकां पूरयतु।**

| |
|---|
| प्रतिदिनं व्यायामं करोति। परस्परं कलहं करोति। मालिन्यानि नदीषु निक्षिपति। मितं हितं च भक्षणं करोति। परिस्थितिं संरक्षति। गृहाङ्कणं स्वच्छं करोति। अनावृतं भक्षणं खादति। |






| **उचितम्** | **अनुचितम्** |
|---|---|
| गृहाङ्कणं स्वच्छं करोति। | अनावृतं भक्षणं खादति। |
| ................................ | ................................ |
| ................................ | ................................ |
| ................................ | |

**प्रवर्तनम् - ५**

**पदसूर्यं दृष्ट्वा वाक्यं निर्मातु।**




उदा - जोसफ् संस्कृतं लिखितवान्।

१. ........................

२. ........................

३. ........................

४. ........................

५. ........................

प्रवर्तनम् - ६

चित्रानुसारम् उचितान् सम्भाषणांशान् पूरयतु।

| |
|---|
| भवन्तः एकैकं युवानम् अवश्यं देशरक्षायै प्रेषयन्तु। |
| पुत्राः देशरक्षणम् अस्माकं धर्मः अतः तदेव कार्यं स्वीकुरुत। |
| इतः परं प्रेषयितुं पञ्चमः पुत्रः नास्तीति मे दुःखम् । |



१. ....................................



२. ....................................



३. ....................................

**ख) वाक्यात् ल्यबन्तमव्ययं चित्वा लिखतु।**

माता पुत्रान् आहूय विविधविषयान् अधिकृत्य उपदिशति ।

| ल्यबन्तम् अव्ययम् |
|---|
| .................... |
| .................... |